শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ২১

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

श्रीः
श्रीमते कृष्णाय परब्रह्मणे नमः
श्रीमते रामानुजाय नमः

# ॥श्रीमन्नारायणीयम् ॥

## दशक - २१

*जम्बूद्वीपादिषु भगवदुपासनाप्रकारवर्णनम्*

মধ্যোদ্ভবে ভুৱ ইলাবৃতনাম্নি ৱর্ষে
গৌরীপ্রধানৱনিতাজনমাত্রভাজি।
শর্ৱেণ মন্ত্রনুতিভিঃ সমুপাস্যমানং
সঙ্কর্ষণাত্মকমধীশ্বর সংশ্রযে ত্বাম্॥ ১॥

ভদ্রাশ্বনামক ইলাবৃতপূর্ৱৱর্ষে
ভদ্রশ্রৱোভিরৃষিভিঃ পরিণূযমানম্।
কল্পান্তগূঢনিগমোদ্ধরণপ্রৱীণং
ধ্যাযামি দেৱ হযশীর্ষতনুং ভৱন্তম্॥ ২॥

ধ্যাযামি দক্ষিণগতে হরিৱর্ষৱর্ষে
প্রহ্লাদমুখ্যপুরুষৈঃ পরিষেৱ্যমাণম্।
উত্তুঙ্গশান্তধৱলাকৃতিমেকশুদ্ধ-
জ্ঞানপ্রদং নরহরিং ভগৱন্ ভৱন্তম্॥ ৩॥

ৱর্ষে প্রতীচি ললিতাত্মনি কেতুমালে
লীলাৱিশেষললিতস্মিতশোভনাঙ্গম্।
লক্ষ্ম্যা প্রজাপতিসুতৈশ্চ নিষেৱ্যমাণং
তস্যাঃ প্রিযায ধৃতকামতনুং ভজে ত্বাম্॥ ৪॥

রম্যে হ্যুদীচি খলু রম্যকনাম্নি ৱর্ষে
তদ্ৱর্ষনাথমনুৱর্যসপর্যমাণম্।
ভক্তৈকৱতসলমমতসরহৃতসু ভান্তং
মতস্যাকৃতিং ভুৱননাথ ভজে ভৱন্তম্॥ ৫॥

www.prapatti.com

ৱৰ্ষং হিৰণ্মযসমাহ্বযমৌত্তৰাহ-
মাসীনমদ্ৰি ধৃতিকৰ্মঠকামঠাঙগম্।
সংসেৱতে পিতৃগণপ্ৰৱৰোৰ্যমা যং
তং ত্বাং ভজামি ভগৱন্ পৰচিন্ময়াত্মন্॥ ৬ ॥

কিংপোত্তৰেষু কুৰুষু প্ৰিযযা ধৰণ্যা
সংসেৱিতো মহিতমন্ত্ৰনুতিপ্ৰভেদৈঃ।
দংষ্ট্ৰাগ্ৰঘৃষ্টঘনপৃষ্ঠগৰিষ্ঠৱৰ্ষ্মা
ত্বং পাহি ৱিজ্ঞনুত যজ্ঞৱৰাহমূৰ্তে॥ ৭ ॥

যাম্যাং দিশং ভজতি কিম্পুৰুষাখ্যৱৰ্ষে
সংসেৱিতো হনুমতা দৃঢভক্তিভাজা।
সীতাভিৰামপৰমাদ্ভুতৰূপশালী
ৰামাত্মকঃ পৰিলসন্ পৰিপাহি ৱিষ্ণো॥ ৮ ॥

শ্ৰীনাৰদেন সহ ভাৰতখণ্ডমুখ্যৈ-
স্ত্ৱং সাঙখ্যযোগনুতিভিঃ সমুপাস্যমানঃ।
আকল্পকালমিহ সাধুজনাভিৰক্ষী
নাৰাযণো নৰসখঃ পৰিপাহি ভূমন্॥ ৯ ॥

প্লাক্ষেৰ্কৰূপমযি শাল্মল ইন্দুৰূপং
দ্বীপে ভজন্তি কুশনামনি ৱহ্নিৰূপম্।
ক্ৰৌঞ্চেম্বুৰূপমথ ৱাযুমযং চ শাকে
ত্বাং ব্ৰহ্মৰূপমযি পুষ্কৰনাম্নি লোকাঃ॥ ১০ ॥

সৰ্ৱৈৰ্ধ্ৰুৱাদিভিৰুডুপ্ৰকৰৈৰ্গ্ৰহৈশ্চ
পুচ্ছাদিকেষ্ৱৱযৱেষ্ৱভিকল্প্যমানৈঃ।
ত্বং শিংশুমাৰৱপুষা মহতামুপাস্যঃ
সন্ধ্যাসু ৰুন্ধি নৰকং মম সিন্ধুশাযিন্॥ ১১ ॥

পাতালমূলভুৱি শেষতনুং ভৱন্তং
লোলৈককুণ্ডলৱিৰাজিসহস্ৰশীৰ্ষম্।
নীলাম্বৰং ধৃতহলং ভুজগাঙগনাভি-
ৰ্জুষ্টং ভজে হৰ গদান্ গুৰুগেহনাথ॥ ১২ ॥



www.prapatti.com

**********

www.prapatti.com